श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# શ્રી મદ્ભાગવત રસિક કુટુંબ

## UG-11.24 - પંચમ સોપાન



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

**નારાયણં(ન્) નમસ્કૃત્ય, નરં(ઞ્) ચૈવ નરોત્તમમ્.**
**દેવીં(મ્) સરસ્વતીં(વ્ઁ) વ્યાસં(ન્), તતો જયમુદીરયેત્.**

**નામસઙ્કીર્તનં(યઁ) યસ્ય, સર્વપાપપ્રણાશનમ્.**
**પ્રણામો દુ:ખશમનસ્, તં(ન્) નમામિ હરિં(મ્) પરમ્.**

**શ્રીમદ્ભાગવતમહાપુરાણમ્**
**એકાદશ: સ્કન્ધ:**
**..અથ ચતુર્વિં(મ્)શોઽધ્યાયઃ .**

**શ્રીભગવાનુવાચ**
**અથ તે સં(મ્)પ્રવક્ષ્યામિ, સાં(ઙ્)ખ્યં(મ્) પૂર્વૈર્વિનિશ્ચિતમ્ .**
**યદ્ વિજ્ઞાય પુમાન્ સદ્યો, જહ્યાદ્ વૈકલ્પિકં(મ્) ભ્રમમ્ .. ૧..**

**આસીજ્જ્ઞાનમથો હ્યર્થ, એકમેવાવિકલ્પિતમ્ .**
**યદા વિવેકનિપુણા, આદૌ કૃતયુગેઽયુગે .. ૨..**

**તન્માયાફલરૂપેણ, કેવલં(ન્) નિર્વિકલ્પિતમ્ .**
**વાઙ્મનોગોચરં(મ્) સત્યં(ન્), દ્વિધા સમભવદ્ બૃહત્ .. ૩..**

તયોરેકતરો હ્યર્થઃ(ફ્), પ્રકૃતિઃ(સ્) સોભયાત્મિકા .
જ્ઞાનં(ન્) ત્વન્યતમો ભાવઃ(ફ્), પુરુષઃ(સ્) સોઽભિધીયતે .. ૪..

તમો રજઃ(સ્) સત્ત્વમિતિ, પ્રકૃતેરભવન્ ગુણાઃ .
મયા પ્રક્ષોભ્યમાણાયાઃ(ફ્), પુરુષાનુમતેન ચ .. ૫..

તેભ્યઃ(સ્) સમભવત્ સૂત્રં(મ્), મહાન્ સૂત્રેણ સં(યઁ)યુતઃ .
તતો વિકુર્વતો જાતોઽ-હં(ઙ્)કારો યો વિમોહનઃ .. ૬..

વૈકારિકસ્તૈજસશ્ચ, તામસશ્ચેત્યહં(ન્) ત્રિવૃત્ .
તન્માત્રેન્દ્રિયમનસાં(ઙ્), કારણં(ગ્) ચિદચિન્મયઃ .. ૭..

અર્થસ્તન્માત્રિકાજ્જજ્ઞે, તામસાદિન્દ્રિયાણિ ચ .
તૈજસાદ્ દેવતા આસન્-નેકાદશ ચ વૈકૃતાત્ .. ૮..

મયા સં(ગ્)ચોદિતા ભાવાઃ(સ્), સર્વે સં(મ્)હત્યકારિણઃ .
અણ્ડમુત્પાદયામાસુર્- મમાયતનમુત્તમમ્ .. ૯..

તસ્મિન્નહં(મ્) સમભવ-મણ્ડે સલિલસં(મ્)સ્થિતૌ .
મમ નાભ્યામભૂત્ પદ્મં(વઁ), વિશ્વાખ્યં(ન્) તત્ર ચાત્મભૂઃ .. ૧૦..

સોઽસૃજત્તપસા યુક્તો, રજસા મદનુગ્રહાત્ .
લોકાન્ સપાલાન્ વિશ્વાત્મા, ભૂર્ભુવઃ(સ્)સ્વરિતિ ત્રિધા .. ૧૧..

દેવાનામોક આસીત્ સ્વર્-ભૂતાનાં(ગ્) ચ ભુવઃ(ફ્) પદમ્ .
મર્ત્યાદીનાં(ગ્) ચ ભૂર્લોકઃ(સ્), સિદ્ધાનાં(ન્) ત્રિતયાત્ પરમ્ .. ૧૨..

અધોઽસુરાણાં(ન્) નાગાનાં(મ્), ભૂમેરોકોઽસૃજત્ પ્રભુઃ .
ત્રિલોક્યાં(ઙ્) ગતયઃ(સ્) સર્વાઃ(ખ્), કર્મણાં(ન્) ત્રિગુણાત્મનામ્ .. ૧૩..

યોગસ્ય તપસશ્ચૈવ, ન્યાસસ્ય ગતયોઽમલાઃ .
મહર્જનસ્તપઃ(સ્) સત્યં(મ્), ભક્તિયોગસ્ય મદ્ગતિઃ .. ૧૪..

મયા કાલાત્મના ધાત્રા,  કર્મયુક્તમિદં(ઞ્) જગત્ .
ગુણપ્રવાહ એતસ્મિન્- નુન્મજ્જતિ નિમજ્જતિ .. ૧૫..

અણુર્બૃહત્ કૃશઃ(સ્) સ્થૂલો, યો યો ભાવઃ(ફ્) પ્રસિધ્યતિ .
સર્વોઽપ્યુભયસં(યઁ)યુક્તઃ(ફ્), પ્રકૃત્યા પુરુષેણ ચ .. ૧૬..

યસ્તુ યસ્યાદિરન્તશ્ચ, સ વૈ મધ્યં(ઞ્) ચ તસ્ય સન્ .
વિકારો વ્યવહારાર્થો, યથા તૈજસપાર્થિવાઃ .. ૧૭..

યદુપાદાય પૂર્વસ્તુ, ભાવો વિકુરુતેઽપરમ્ .
આદિરન્તો યદા યસ્ય, તત્ સત્યમભિધીયતે .. ૧૮..

પ્રકૃતિર્હ્યસ્યોપાદાન-માધારઃ(ફ્) પુરુષઃ(ફ્) પરઃ .
સતોઽભિવ્યઞ્જકઃ(ખ્) કાલો, બ્રહ્મ તત્ત્રિતયં(ન્) ત્વહમ્ .. ૧૯..

સર્ગઃ(ફ્) પ્રવર્તતે તાવત્- પૌર્વાપર્યેણ નિત્યશઃ .
મહાન્ ગુણવિસર્ગાર્થઃ(સ્), સ્થિત્યન્તો યાવદીક્ષણમ્ .. ૨૦..

વિરાણ્મયાઽઽસાદ્યમાનો, લોકકલ્પવિકલ્પકઃ .
પં(ઞ્)ચત્વાય વિશેષાય, કલ્પતે ભુવનૈઃ(સ્) સહ .. ૨૧..

અન્ને પ્રલીયતે મર્ત્ય-મન્નં(ન્) ધાનાસુ લીયતે .
ધાના ભૂમૌ પ્રલીયન્તે, ભૂમિર્ગન્ધે પ્રલીયતે .. ૨૨..

અપ્સુ પ્રલીયતે ગન્ધ, આપશ્ચ સ્વગુણે રસે .
લીયતે જ્યોતિષિ રસો, જ્યોતી રૂપે પ્રલીયતે .. ૨૩..

રૂપં(વ઼્) વાયૌ સ ચ સ્પર્શે, લીયતે સોઽપિ ચામ્બરે .
અમ્બરં(મ્) શબ્દતન્માત્ર, ઇન્દ્રિયાણિ સ્વયોનિષુ .. ૨૪..

યોનિર્વૈકારિકે સૌમ્ય, લીયતે મનસીશ્વરે .
શબ્દો ભૂતાદિમપ્યેતિ, ભૂતાદિર્મહતિ પ્રભુઃ .. ૨૫..

સ લીયતે મહાન્ સ્વેષુ, ગુણેષુ ગુણવત્તમઃ .
તેઽવ્યક્તે સં(મ્)પ્રલીયન્તે, તત્ કાલે લીયતેઽવ્યયે .. ૨૬..

કાલો માયામયે જીવે, જીવ આત્મનિ મય્યજે .
આત્મા કેવલ આત્મસ્થો, વિકલ્પાપાયલક્ષણઃ .. ૨૭..

એવમન્વીક્ષમાણસ્ય, કથં(વ઼્) વૈકલ્પિકો ભ્રમઃ .
મનસો હૃદિ તિષ્ઠેત, વ્યોમ્નીવાર્કોદયે તમઃ .. ૨૮..

એષ સાં(ઙ્)ખ્યવિધિઃ(ફ્) પ્રોક્તઃ(સ્), સં(મ્)શયગ્રન્થિભેદનઃ .
પ્રતિલોમાનુલોમાભ્યાં(મ્) પરાવરદૃશા મયા .. ૨૯..

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહં(મ્)સ્યાં(મ્)
સં(મ્)હિતાયામેકાદશસ્કન્ધે ચતુર્વિં(મ્)શોઽધ્યાયઃ ..

ૐ પૂર્ણમદ:(ફ્) પૂર્ણમિદં(મ્) પૂર્ણાત્પૂર્ણમુદ*ચ્યતે

પૂર્ણ*સ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિ*ષ્યતે.

ૐ શાન્તિ:(શ્) શાન્તિ:(શ્) શાન્તિ:

